National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 264-266
© 2025 NJHSR
www.sanskritarticle.com

**संघमित्रा जेना**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

**Correspondence:**
**संघमित्रा जेना**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

# गीतशङ्कर-गीतसुन्दरकाव्ययोः अलङ्कारविचारः

**संघमित्रा जेना**

"कवेः कर्म काव्यम्" इत्याधारेण काव्यसंरचनायाः मुख्यकारणं कविरेव भवति। सः कविः काव्यरचना-काले स्वतन्त्रः, प्राधानश्च भवति। कवेः महत्त्वप्रतिपादनाय काव्यप्रकाशे एवम् उक्तमस्ति-

**नियतिकृतनियमरहितां ह्लादेकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयती।।**[1]

### गीतशङ्कर-गीतसुन्दरयोः परिचयः-

काञ्चीकामकोटीपीठस्य ६२तमाचार्येण श्रीचन्द्रशेखरेन्दसरस्वत्या विरचितं गीतशङ्करम् नाम गीतिकाव्यम् अस्ति।अस्य काव्यस्य अन्यानि नामानि अपि सन्ति, यथा-शिवाष्टपदी शिवगीतिमाला इत्यादीनि। काव्येऽस्मिन् द्वादशसर्गाः, विंशत्यष्टपदानि सन्ति। अत्र शक्तिस्वरूपिण्याः देवीकामाक्ष्याः तथा एकाम्रनाथस्य (शिवस्य) लीलावर्णनं कृतमस्ति। अस्य मुख्यरसः शृङ्गारः, नायकनायिकात्वेन एकाम्रेश्वर-कामाक्ष्यौ प्रतिष्ठितौ।

एवमेव श्रीसदाशिवदीक्षितेन विरचितं गीतसुन्दरम् नाम गीतिकाव्यं अस्ति।अत्र कविना मीनाक्षी-सुन्दरेश्वरयोः दिव्यप्रेमलीला सुन्दरतया वर्णिता । यत् वर्णना मुख्यतः कवेः सुपाण्डित्यं रचनाकौशलं च जनयति । कविः काव्य संरचनायां रसालङ्कारछन्दादिनां सुमधुरतया संयोजना करोति । येन काव्यस्य सौन्दर्याधिकम् अभिवर्द्धते ।

### अलङ्कारशब्दनिष्पत्तिः –

'अलङ्कारः' इति शब्दः 'अलम्' इत्यनेन 'कृञ्' धातोः 'घञ्' प्रत्ययेन निष्पन्नः। अयं शब्दः भूषणार्थं द्योतयति। भावार्थेन कटककुण्डलादिभिः कामिन्याः सौन्दर्यं साधयति एवं करणार्थेन शब्दालंकारत्वेन अर्थालङ्कारत्वेन अनुप्रासोपमादिभिः अलङ्कारैः कविता कामिन्याः शोभाधिकं वर्धयति। येन कुरूपा कविता कामिन्या अपि सौन्दर्यं लभते।

### अलङ्कारस्य महत्वम्-

काव्यसंरचनायां छन्दः, रसः, ध्वनिः इत्यादयः प्रयुज्यन्ते, येषां मध्ये काव्यस्य सौन्दर्यधायकतया अलङ्कारस्य महत्त्वं प्रधानतया वर्तते। अलङ्कारविना काव्यस्य सौन्दर्यं नैव तिष्ठति । एतद्विषये वर्णितमस्ति यथा –**"सौन्दर्यमलङ्कारः, काव्य ग्राह्यं अलङ्कारात्"**[2]। काव्ये अलङ्कारः न केवल सौन्दर्यतत्वं वर्धयति अपि तु अर्थचमत्कारमपि जनयति । सः चमत्कारः कदाचित् शब्देन, कदाचित् अर्थेन, पुनः कदाचित् उभयोः संयोगेनापि उत्पद्यते।

### अलङ्कारलक्षणम् –

अलंकाराणां विपये विविधाः आलङ्कारिकाः स्वस्वमतानि प्रतिपादयन्ति। अतः अत्र अलंकारस्य सामान्यलक्षणे तेषां अभिमतानि संक्षेपेण समालोच्यन्ते।

आदौ भामहस्योक्तिः - **न कान्तमपि निर्भूषं विभाति वनितामुखम्।**[3]

दण्डिना प्रोक्तम्–

**काव्यशोभाकारान् धर्मानलङ्कारान् प्रचक्षते।**[4]

आचार्यमम्मटस्य उक्तिः-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥**[5]

**अलङ्कारस्य प्रयोजनम् –**

अलङ्कारशास्त्रज्ञानं विना काव्यस्य महत्वं सम्यक् ज्ञातुं न शक्यते। अलङ्काराः काव्ये सौन्दर्यबोधकाः, शैल्याः विकासे सहायकाः, रसानुभूतौ च अत्यन्तोपयोगिनः भवन्ति। काव्ये नैपुण्यार्थे अलङ्काराणां प्रयोगः अत्यावश्यकः भवति। अलङ्कारैः वाक्यदोषाः निवार्यन्ते।अतः वैदिकलौकिकग्रन्थानां पूर्णावगमाय अलङ्कारशास्त्र-ज्ञानम् अपरिहार्यम्।

**अलंकारस्य भेदः -**

संस्कृतसाहित्येषु काव्यशास्त्रेषु अलंकाराणां वहबः प्रयोगः परीदृश्यन्ते। अलङ्कारशब्दः न केवलं काव्ये सौन्दर्यतत्त्वं वर्धयति, अपि तु अर्थेचमत्कृतिरपि जनयति। तदेव चमत्कृतिरर्थः कदाचित् अनुप्रासोपमादिशब्दप्राचुर्यमाध्यमेन अलंकारस्य मर्मत्वं प्रतिपादयति। वस्तुतः अलङ्कारः द्विविधं भवति, यथा-शब्दालङ्कारः अर्थालङ्कारः इति। पुनः केचनालङ्कारिकाः शब्दार्थालङ्कारः नाम तृतीयमपि अलङ्कारं स्वीकुर्वन्ति।

**१-शब्दालङ्कारः –** मुख्यतः शब्दस्य प्राधान्येव शब्दालङ्कारः भवति। शब्दालङ्कारस्य लक्षणविषये मम्मटाचार्येण उक्तम् – "शब्दपरिवृत्त्यसहत्वे शब्दालङ्कारः"। अर्थात् यत्र स्वेच्छानुसारं शब्दानां परिवर्त्तनं कर्तुं न शक्यते तत्र शब्दालंकारः भवति। यदि शब्दानां परिवर्तनं क्रियते चेत् तर्हि तत्र शब्दालङ्कारस्य हानिः भवति। शब्दालङ्कारत्वेन यमकम्, अनुप्रासः इत्यादयः अलङ्काराः गृह्यन्ते।भोजराजेन अपि शब्दालङ्कारविषये सरस्वतीकण्ठाभरणे प्रोक्तम् -

**"ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः।**

**शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः "॥**

**२-अर्थालङ्कारः -**

अर्थस्य प्राधान्येव यः अलङ्कार सः अर्थालङ्कारः। आचार्यमम्मटेन काव्यप्रकाशे अर्थालंकारस्य लक्षणं निर्दिष्टम्- "शब्दपरिवृत्तिसहत्वे अर्थालङ्कारः"। अर्थात् यत्र स्वेच्छानुसारं शब्दानां परिवत्तनं कर्तुं शक्यते। अर्थालङ्कारे तु शब्दानां परिवर्त्तनं क्रियते चेत् अर्थस्य किमपि हानिः न भवति। अर्थालङ्कारत्वेन रूपकम्, उत्प्रेक्षा इत्यादयः अलङ्काराः स्वीक्रियन्ते।अस्य लक्षणं विषये भोजराजस्य मतम्-

**अलमर्थमलङ्कर्तुं यद्व्युत्पत्त्यादिवर्त्मना।**
**ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया।।**[6]

**३-शब्दार्थालङ्कारः -** अत्र शब्दः अर्थश्च उभौ प्राधान्येव प्रयुज्यते। शब्दालङ्कारः इत्यस्य नाम उभयालङ्कारः इत्यऽपि वक्तुं शक्यते। अस्य लक्षणे भोजराजस्योक्तिः, यद्यथा-

**"शब्देभ्यो यः पदार्थेभ्यः उपमादिः प्रतीयते।**

**विशिष्टोऽर्थः कवीनां ता उभयालङ्क्रियाः प्रियाः॥**[7]

**गीतशङ्करे अलङ्कारविचारः-**

आचार्यः श्रीचन्द्रशेखरेन्दसरस्वतीस्वामी स्वकाव्ये गीतशङ्करे अलङ्काराणां सुमधुरं समन्वयं कृतवान्। यदधः केषुचन श्लोकेषु अलङ्कारप्रयोगः प्रतिपाद्यते-

**१-रूपकालङ्कारः**

**लक्षणम् -** **रूपकं रूपितारोपाद् विषये निरपह्नवे।**[8]

**लक्ष्यम् -** **वासन्तिकाकुसुमकोमलदर्शनीयैः**
**अङ्गैरनङ्गविहितज्वरपारवश्यात्।**
**कम्पातटोपवनसीमनि विभ्रमन्तीं**
**गौरिमिदं सरसमाह सखी रहस्यम्।।**[9]

अस्मिन् श्लोके "वासन्तिकाकुसुमकोमलदर्शनीयैः अङ्गैः" इत्यत्र गौरीदेव्याः शरीरं वसन्तकुसुमस्य कोमलतया साक्षात् आरोप्यते। अत्र उपमानः वसन्तिकाकुसुम एवं उपमेय गौरीदेव्याः अङ्गयोः अभेदः प्रतिपादने रूपकालङ्कारः इति स्पष्टः।

**अपि च-**

**पटुतरचाटुवचोमृतशिशिरनिवारितमनसिजतापं**
**तरुणवनप्रियभाषणया सह सादरविहितसुलापं कलये।।**[10]

अत्र "वचोमृत" इत्यस्य प्रयोगे चाटुवचनानां अमृतत्व-शैत्ययोः आरोपः कृतः। तस्मात् अत्रापि रूपकालङ्तारः विद्यते।

**गीतसुन्दरकाव्ये अलङ्कारविचारः-**

गीतशङ्करम् इति गीतिकाव्ये कविना श्रीसदाशिवदीक्षितेन अलङ्काराणां सौन्दर्यपूर्णः प्रयोगः कृतः। यथा-

**१-उपमालङ्कारः**

**लक्षणम् - साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।।**[11]

**लक्ष्यम् - अपि तमसि मम वसतिरिव विपिन-कौमुदी।**
**गिरिश-मतिरिव बहुल-कुसुम-वन-षट्पदी।।**[12]

अत्र 'इव' इति उपमावाचकशब्दस्य साक्षात् प्रयोगात् अस्मिन् शब्देनापि उपमानोपमेसम्बन्धः सूचितः। वसतिः-विपिनकौमुदी इव, गिरिशमतिः-षटपदी इव इति स्पष्टा तुलना परिलक्ष्यते। अतः अत्र उपमालङ्कारः भवति।

**२- रूपकालङ्कारः**

**लक्षणम्- रूपकं रूपितारोपाद् विषये निरपह्नवे।**[13]

**लक्ष्यम्- अद्यैव हन्त कुसुमायुध-जैत्र-यात्रा**
**विस्तारिता पट-कुटी मकराङ्कितेव।**

**आलोक-भीत-सकलारि-कला दशाभिर्-**
**आबद्ध-रश्मिर्-उदिता हरिणाङ्कमूर्तिः मकराङ्किकतेव।।**[14]

अत्र हरिणाङ्कमूर्तिः (चन्द्रः) कुसुमायुधस्य जैनयात्रिकेति साक्षात् परिकल्प्यते। अत्र उपमानोपमेययो: अभेदं प्रतिपादनात् अयं रूपकालङ्कारस्य प्रकृष्टमुदाहरणं भवति।

**३- अर्थान्तरन्यासलङ्कारः**

**लक्षणम्- सामान्यं वा विशेषेण विशेषस्तेन वा यदि।**
**कार्यं च कारणेनेदं कार्येण च समर्थ्यते।**
**साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।।**[15]

**लक्ष्यम्- प्राप्तश्च प्रार्थनीयः सुदति वदति च प्रेमसारानुसारं**
**वामे कामेषु-भिन्नं वपुर्-अतिमृदुलं पश्य पश्यालिकस्य।**
**मानं मौनं च मा गा: सखि सुखय रतौ सत्वराजित्वारा त्वं**
**रन्तुर्-भर्तुर्-वधूनां-अभिलषित-सुख-प्रापणः श्लाघनीय:।।**[16]

अस्मिन् श्लोके प्रथमं नायिकाया भावः निरूप्यते। ततः उपदेशरूपेण सामान्यसत्यं प्रतिपाद्यते- नायिकाया अनुरक्तिः एव सुखप्रदा इति । एवं पूर्वोक्तार्थस्य समर्थनार्थं सामान्यसत्यस्य न्यासात् अत्र अर्थान्तरं द्योतयति। अतोऽत्र अर्थान्तरन्यासलङ्कारः भवति।

**उपसंहारः –**

प्रसङ्गेऽस्मिन् स्पष्टं भवति यत् आचार्यश्रीचन्द्रशेखरेन्द्रस्वामिनः गीतशङ्करे तथा श्रीसदाशिवदीक्षितेन गीतसुन्दरकाव्ये अलङ्काराणां प्रयोगः न केवलं शोभाकारकः, अपि तु भावप्रकाशनाय अत्यन्तं सहायकरूपेण व्यवस्थितः। रूपकः, उपमा, अर्थान्तरन्यासादयः अलङ्काराः काव्यस्य भावगाम्भीर्यं, रससम्पत्तिं च विशेषेण अभिवर्ध-यन्ति। कविभ्यां स्वानुभूतिभिः सह अलङ्काराणां सम्यक् संयोजनं कृत्वा गीतिकाव्ययोः माधुर्यं,सौष्ठवं च अभिव्यक्तम्।अत एव एते काव्ये अलङ्कारप्रयोगाः सहृदयेषु चिरस्थायिनः सन्ति, तथा च संस्कृतगीतिसाहित्यस्य समृद्धिं सूचयति इति निसन्देहम्।

**संकेताक्षरसूची-**

का.प्र- काव्यप्रकाशः

का.ल.सू.वृ-काव्यालङ्कारसूत्रवृत्तिः

का.ल-काव्यालङ्कारः

का.द-काव्यादर्शः

सा.द-साहित्यदर्पणः

स.क-सरस्वतीकण्ठाभरणम्

गी.श-गीतशङ्करम्

गी.सु-गीतसुन्दरम्

**सहायकग्रन्थसूची-**

1.गीतशङ्करम्- आचार्यश्रीचन्द्रशेखरेन्द्रसरस्वती (६२तम), Translated by P. R KANNAN, January 19,2019

2.गीतसुन्दरम्-श्रीसदाशिवदीक्षितः, Translated by P. R KANNAN, Mumbai, 14.07.2014

3.काव्यप्रकाशः-मम्मटाचार्यः, सविमर्शशशिकला हिन्दीव्याख्योपेतः, व्याख्याकारः- डॉ.सत्यव्रतसिंह, चौखाम्बा विद्याभवन,वाराणसी।

4.काव्यालङ्कारसूत्रवृत्तिः-श्रीमद्वामनाचार्य:,व्याख्याकारः-श्रीगोपेन्द्र-त्रिपुरहरभूपाल, चौखाम्बा कृष्णदास अकादमी, वाराणसी, तृतीयः विं.सं.२०६०, सन् २००३।

5.काव्यालङ्कारः-आचार्यभामहः,सत्यदेवचौधरी, प्रकाशकः परिमल-पब्लिकेसन्स: १७/२८,शक्तिनगर , दिल्ली-११०००७,

6.काव्यादर्शः -आचार्यदण्डिविरचितः, प्रकाशकः-मेहरचन्द लछमन-दास, २७३६, कूचा चेलां, दरियागंज, दिल्ली ११०००६, प्रथमं संस्करणम् १६७३ई.

7.साहित्यदर्पणः-विश्वनाथकविराजः, व्याख्याकारः – डॉ.सत्यव्रतसिंहः,प्रकाशक- चौखाम्बा विद्याभवन, पो. बा.नं-१०६९(१०६९),वाराणसी २२१००१

8.सरस्वतीकण्ठाभरणम्- भोजराजः, संपादकः- विश्वनाथभट्टाचार्यः, प्रकाशकः काशी हिन्दु विश्वविद्यालयः, वाराणसी-५, प्रथमः संस्करण, १६७६

**पाद टिप्पणी**

[1]का.प्र-१.१
[2]का. ल. सू. वृ-१.२
[3]का. ल-१.१३
[4]का. द-२.१
[5]का. प्र-८.६७
[6]स. क-३.१
[7]स. क-४.१
[8]सा.द-१० परिच्छेद:,१४
[9]गी. श-सर्ग१, श्लोकः९
[10]गी.श-स.२,अ.६,गी.३
[11]सा.द-१०.१४
[12]गी.सु-स.४,अ.१३,गी.२
[13]सा.द-१०.परिच्छेदः, पृ. ६७६
[14]गी.सु- स.४,श्लोकः३
[15]सा.द-१०.३२
[16]गी.सु- स.५,श्लोकः७